श्चुनारीन स्याच्छुभं क्वचन ताजिकशास्त्रगीतम्" नी॰ता॰।

**आपोमय** त्रि॰ आपस्+विकारे प्राचुर्य्ये वा मयट्। १जलविकारे "आपोमयः प्राणस्तेजोमयी वाक्" छा॰उ॰। "आपोमयाः सर्व्वरसाः सर्व्वमापोमयं जगत्" भा॰ आ॰ १८०अध्या॰ "भूमेर्गन्धगुणान् भुङ्क्ते पिवत्यापोमयान् रसान्" भा॰आश्व॰ २८अ॰। "मन्युजोऽग्निर्दहन्नापो लोकाश्चापोमयाः स्मृताः" भा॰आ॰१८०। जलप्लाविते २जलप्रचुरे "विलोक्य ताभ्यां गदितः सर्व्वमापोमयं जगत्। आवां जहि न यत्रोर्व्वी सलिलेन परिप्लुता" देवीमा॰।

**आपोमूर्त्ति** पु॰ स्वारोचिषस्य मनोः १पुत्रभेदे। "हविघ्नः सुकृतिर्ज्योतिरापोमूर्त्तिरयस्मयः। प्रथितश्च नभस्यश्च नभ ऊर्ज्जस्तथैव च। स्वारोचिषस्य पुत्रास्ते मनोस्तात! महात्मनः" हरिवं॰ ६अ॰। दशमे मन्वन्तरे आत्रेये सप्तर्षिमध्ये २ऋषिभेदे च "दशमे त्वथ पर्य्याये द्वितीयस्यान्तरे मनोः। हविष्मान् पौलहस्त्यैव सुकृतिश्चैव भार्गवः। आपोमूर्त्तिस्तथात्रेयो वाशिष्ठश्चाष्टकः स्मृतः" इति हरिवं॰७अ॰

**आपोऽशान** न॰ आपसा जलेन अशानं अश—व्याप्तौ भावे बा॰ आनच्। जलेन उपरिष्टादधस्ताच्चास्तरणरूपे अन्नाच्छादनार्थे कर्म्मणि। "आपोऽशानेनोपरिष्टादधस्तादश्नता तथा। अनग्नममृतञ्चैव कार्य्यमन्नं द्विजन्मना" या॰स्मृ॰। "भुञ्जानेन द्विजन्मना उपरिष्टादधस्ताच्च आपोऽशानाख्येन कर्म्मणा अन्नमनग्नममृतं च कार्य्यम्" मिता॰। "आपोऽशानक्रियापूर्व्वं सत्कृतान्नमकुत्सयन्" या॰स्मृ॰। "आपोऽशानक्रियापूर्व्वम् अमृतोपस्तरणमसि स्वाहेत्यादिकं कृत्वा" मिता॰ "आपोऽशानं कर्म्म कुरु" भवदेवः।

**आप्त** त्रि॰आप-क्त। १प्राप्ते २प्रत्ययिते विश्वस्ते। ३यथार्थज्ञानयुक्ते ४युक्तियुक्ते च "आप्तश्रुतिराप्तवचनं तु" सां॰ का॰। "आप्ता प्राप्ता युक्तेति यावत् आप्ता चासौ श्रुतिश्चेति आप्तश्रुतिः श्रुतिर्वाक्यजनितं वाक्यार्थज्ञानं तच्च स्वतःप्रमाणम् अपौरुषेयवाक्यजनितत्वेन सकलदोषाशङ्काविनिर्मुक्तत्वेन युक्तं भवति एवं वेदमूलकस्मृतीतिहासपुराणजनितज्ञानमपि युक्तम्। कपिलस्य कल्पादौ कल्पान्तराधीतश्रुतिस्मरणसम्भवः सुप्तप्रबुद्धस्येव पूर्व्वेद्युरवगतार्थानामपरेद्युः। आप्तग्रहणेन चायुक्ताः शाक्यभिक्षुनिर्ग्रन्थिकसंसारमोचकादीनामागमाभासा निराकृता भवन्ति अयुक्तत्वञ्चैतेषां विगानात् छिन्नमूलत्वात् प्रमाणविरुद्धाभिधानात् कैश्चिदेव म्लेच्छादिभिः पुरुषापसदैः पशुप्रायैः परिग्रहाद्बोध्यम्" सा॰त॰कौ॰ "तस्मादपि चासिद्धं परोक्षमाप्तागमात् सिद्धम्" सां॰का॰। यथार्थज्ञानविशिष्टरूपाप्तोक्तत्वनिश्चयस्य शाब्दबोधहेतुत्वमिति मीमांसकाः नैयायिकास्तन्न मन्यन्ते यथोक्तं शब्दश॰प्र॰ "साकाङ्क्षत्वादिधीरिव वाक्यार्थगोचरज्ञानवदुक्तत्वरूपस्याप्तोक्तत्वस्यापि निश्चयः शाब्दधीहेतुरतोनैकपदार्थधर्म्मिकोऽपरपदार्थस्यान्वयबोधोऽनुमितिः सिद्धिसत्त्वे विनानुमित्सां तदसम्भवात् परन्त्वनुमितेरन्यएव किन्त्वसौ गृहीतग्राहित्वान्न प्रमा यज्जातीयविशिष्टज्ञानत्वावच्छेदेन समानाकारनिश्चयोत्तरत्वं तज्जातीयान्ययथार्थज्ञानस्य वाऽगृहीतग्राहित्वेन प्रमात्वात् अतएव धारावाहिकप्रत्यक्षव्यक्तीनां समानाकारग्रहोत्तरवर्त्तित्वेऽपि न तासां प्रमात्वहानिः हानिस्तु समानाकारानुभवसमुत्थानां स्मृतीनामिति जरन्मीमांसकानां समाधानं निरस्यति। नाप्तोक्तता तु वाक्यार्थगर्भा ज्ञातोपयुज्यते। वाक्यार्थानामपूर्व्वत्वात् संशयेऽप्यन्वयोदयात्। यद्येकपदार्थवदपरपदार्थपर्य्यवसन्नस्य वाक्यार्थस्य ज्ञानवदुक्तत्वरूपाया आप्तोक्ततायानिश्चयः शाब्दमतेः कारणं स्यात् स्यादपि तेनैव रूपेण साध्यनिश्चयेन प्रतिबन्धादेकपदार्थपक्षिकाया अपरपदार्थानुमितेरनुत्पादो नचैवं, शाब्दधियः पूर्व्वं वाक्यार्थस्योपस्थित्यनियमेन तद्गर्भस्याप्तोक्तत्वस्यापि मतेरनावश्यकत्वात् अन्यथा वेदस्याप्यनुवादकतापत्तेः एकपदार्थेऽपरपदार्थस्य शब्दे वाक्यार्थज्ञानवदुक्तत्वस्य संशयेऽपि शाब्दमतेरुत्पादाच्च। अतएवाप्तोक्तत्वस्य संशये व्यतिरेकनिश्चये वान्वयबुद्धेरनुत्पादादवश्यन्तन्निश्चयस्तत्र हेतुरित्यपि प्रत्युक्तम् असिद्धेः"। ५कुशले "प्राजकश्चेद्भवेदाप्तः" मनुः। "आप्तः कुशलः" कुल्लू॰। ६सम्पूर्णे "यजेत राजा क्रतुभिर्विविधैराप्तदक्षिणैः" मनुः ७बन्धौ "निग्रहात् स्वसुराप्तानां बधाच्च धनदानुजः" रघुः ८जटायां स्त्री हारा॰ ९सम्बद्धे १०लब्धे च त्रि॰ हेम॰।

**आप्तकाम** त्रि॰ आप्तः प्राप्तःकामोयेन। १ब्रह्मात्मैक्यावगन्तरि यथा चास्याप्तकामत्वं तथोक्तं वृ॰उप॰भाष्ययोः। "तद्वा अस्यैतदतिच्छन्दा अपहतपाप्माऽभयं रूपम्। तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमेवायं पुरुषः प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्। तद्वा अस्यैतदाप्तकाममकामं रूपं शोकान्तरम्। अत्र पिताऽपिता भवति माताऽमाता लोका अलोका देवा अदेवा वेदा अवेदाः। अत्र स्तेनो-